This requires some explanation, because there is no mention, as far as I know, of the word Mudrā in the works on dancing and dramaturgy such as Bharata Nāṭyaśāstra, Abhinayadarpaṇa,[1] Saṅgītaratnākara etc. The word is not to be found even in [2]Nāṭyaśāstrasaṃgraha of Uṭake Govindācārya and in Bharatakośa, the modern encyclopaedia of dancing and dramaturgy compiled by Mr. Ramakṛṣṇakavi. This clearly indicates that in the proper tradition of Nṛtta and Nṛtya, mudrās may not have been technically recognised.

However the fact is that mudrās from the point of view of dancing are really Hastābhinayas. The Viṣṇudharmottara has recognised this fact and has called the tantrik mudrās, Mudrāhastas and included them in the section of Nṛttasūtra.

Owing to the very nature of ancient Indian dancing, mudrās could not but become a part of dancing, because not only gods and goddesses are personated in the Indian dancing but the several modes of worship are also suggested in such representation. It is but natural that the ritual mudrās symbolising all these items should be used for the purpose. Thus even though works on dancing did

[1] A. K. Coomaraswamy in his work the Mirror of Gestures (Abhinaya Darpaṇa) mentions in the list of combined hands—मुद्रा and लीनमुद्रा (p. 44) and मुष्टिमुद्रा (p. 49). It is not stated from what works on dancing these are taken.

Saṅgīta-Darpaṇam of Catura Damodara mentions Mudrā in connection with Nṛtya and defines it as संप्रदायानुसरणं मुद्रा हृदयरञ्जनी । (p. 199) while defining नेरि he includes the word Mudrā also—

रेखामुद्राप्रमाणाढ्यं नानाकरविभूषितम् ।
दिक्चक्राभिमुखं नृत्तं नेरिरित्यभिधीयते ॥ २०९ ॥

[2] Nāṭyaśāstrasaṃgraha, Vol. I edited by K. Vasudeva Shastri etc., Tanjore Saraswati Mahal Series No. 52, 1953.

not recognise mudrās as hastābhinayas, on account of the nature of Indian dancing they became part and parcel of it.

The probable reason, why mudrās were not recognised by works on dancing, is that these woks purported to describe abhinayas pertaining to human actions and feelings and did not include mudrās because they referred to divine symbolisation, which was a part of the religious ritual. But in practice this distinction could not be maintained because Indian dancing was not only religious in origin but was regarded as a mode of worship. The Viṣṇudharmottara not only describes Mudrās as Mudrāhastas and calls a number of them Nṛttaśāstra-mudrās, but also regards Nṛtta as a mode of worship—Pūjā.

पुष्पनैवेद्यदानेभ्यो नृत्तदानं विशिष्यते ॥
स्वयं नृत्तेन यः कुर्याद्देवदेवस्य पूजनम् ।
विशेषेण महाभाग तस्य तुष्यति केशवः ॥ २६ ॥
नृत्तं गीतं तथा वाद्यं दत्त्वा देवाय विष्णवे ।
सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते ॥ २७ ॥
देवताराधनं कुर्याद्यस्तु नृत्तेन धर्मवित् ।
स सर्वकामानाप्नोति मोक्षोपायं च विन्दति ॥ २९ ॥ (अ. ३४)

Whatever may be the true explanation of the absence of mention of mudrās in the works on dancing the fact remains, as far as I know, that the Viṣṇudharmottara is the only ancient work which has regarded the tantric mudrās as a part of the art of dancing and included them in the section of Nṛttasūtra.

* * *

I am grateful to the Gujarat University, Ahmedabad, for helping me with a grant to do research work on some mss. in the possession of the Hemachandrāchārya Jñāna Bhaṇḍāra, Pātaṇa (N. Gujarat). I chose for the purpose, three Mss. two on Mudrās (Jain) and one on domestic architecture named Pramāṇamañjarī. I am thankful to Muni Shri Puṇyavijayaji for getting me these Mss.

I take this opportunity of expressing my sincere thanks to my painstaking teacher and great friend Prof. R. C. Parikh, Director of the B. J. Institute of Learning and Research, Ahmedabad, for the valuable guidance that I have received from him in connection with my research work in general and this one in particular.

Lastly, my thanks are due to Prof. G. H. Bhatt, Director of Oriental Institute, Baroda, for accepting this work for publication in the M. S. University Oriental Series.

Panchavati,
Ahmedabad,
24-5-1956

PRIYABALA SHAH

मुद्राविचारप्रकरणम्

([२]शुद्धिमुद्राद्वयम्)

१ नाराचमुद्रा—दक्षिणाङ्गुष्ठेन तर्जनीमध्यमे समाक्रम्य पुनर्मध्यमा मोक्षणेन नाराचमुद्रा ॥ १ ॥

२ कुम्भमुद्रा—किञ्चिदाकुञ्चिताङ्गुलीकस्य वामहस्तस्योपरि शिथिलमुष्टिदक्षिणकरस्थापनेन कुम्भमुद्रा ॥ २ ॥

[इति] शुद्धिमुद्राद्वयम् ॥

(६ विन्यसनमुद्राः)

१ हृदयमुद्रा—बद्धमुष्टयोः करयोः संलग्नसम्मुखाङ्गुष्ठयोर्हृदयमुद्रा ॥ १ ॥

२ शिरोमुद्रा—तावेव मुष्टीं (? ष्टी) समीकृतोर्ध्वाङ्गुष्ठौ शिरसि विन्यसेदिति शिरोमुद्रा ॥ २ ॥

३ शिखामुद्रा—पूर्ववन्मुष्टी बद्ध्वा तर्जन्यो(? न्यौ) प्रसारयेदिति शिखामुद्रा ॥ ३ ॥

४ कवचमुद्रा—पुनर्मुष्टी(? ष्टि)बन्धं विधाय कनीयस्यङ्गुष्ठौ प्रसारयेदिति कवचमुद्रा ॥ ४ ॥

५ क्षुरप्रमुद्रा—कनिष्ठिकामङ्गुष्ठेन संपीड्य शेषाङ्गुलीः प्रसारयेदिति क्षुरप्रमुद्रा ॥ ५ ॥

६ अस्त्रमुद्रा—तत्र स दक्षिणकरेण मुष्टिं बद्ध्वा तर्जनीमध्यमे प्रसारयेदिति अस्त्रमुद्रा ॥ ६ ॥

[एता] हृदयादीनां विन्यसनमुद्रा [:] ॥

(६ आवाहनादिमुद्राः)

१ महामुद्रा—प्रसारिताधोमुखां(? खाभ्यां) हस्ताभ्यां पादाङ्गुलीतलमस्तकस्पर्शान्महामुद्रा ॥ १ ॥

२ धेनुमुद्रा—अन्योन्यग्रथिताङ्गुलीषु कनिष्ठिकानामिकयोर्मध्यमातर्जन्योश्च संयोजनेन गोस्तनाकारा धेनुमुद्रा ॥ २ ॥

३ आवाहनीमुद्रा—हस्ताभ्यामञ्जलिं कृत्वा प्रकाममूलपर्वाङ्गुष्ठसंयोजनेनावाहन(? नी) मुद्रा ॥ ३ ॥

४ स्थापनीमुद्रा—इयमेवाधोमुखी स्थापनी ॥ ४ ॥

५ संनिधापनीमुद्रा—संलग्नमुष्टयुच्छ्रि (? च्छ्रि)ताङ्गुष्ठौ करौ संनिधापनी ॥ ५ ॥

६ निष्ठुरामुद्रा—तावेव गर्भगाङ्गुष्ठौ निष्ठुरामुद्रा ॥ ६ ॥

एता आह्वा(? वाह)नादिमुद्राः ॥

(पूजामुद्राद्वयम्)

१ गोवृषणमुद्रा—बद्धमुष्टेर्दक्षिणहस्तस्य मध्यमातर्जन्योर्विस्फारिता प्रसारणेन गोवृषणमुद्रा ॥ १ ॥

२ त्रासनीमुद्रा—बद्धमुष्टेर्दक्षिणहस्तस्य प्रसारिततर्जन्या वामहस्ततलताडनेन शसभा (? त्रासनी) ॥ २ ॥

[एते]नेश(? त्रा)स्त्रयोः पूजामुद्रा (? द्रे) ॥

(४ जयादिदेवतापूजामुद्राः)

१ पाशमुद्रा—अङ्गुष्ठे तर्जनी(? नीं) संयोज्य शेषाङ्गुलिप्रसारणेन पाशमुद्रा ॥ १ ॥

२ अङ्कुशमुद्रा—बद्धमुष्टेर्वामहस्तस्य तर्जनीं प्रसार्य किञ्चिदाकुञ्चयेदित्यङ्कुशमुद्रा ॥ २ ॥

३ ध्वजमुद्रा—संहतोर्ध्वाङ्गुलिवामहस्तमूले चाङ्गुष्ठं तिर्यग् विधाय तर्जनीचालनेन ध्वजमुद्रा ॥ ३ ॥

४ वरदमुद्रा—दक्षिणहस्तमुत्तानं विधायाधः करशाखाः प्रसारयेदिति वरदमुद्रा ॥ ४ ॥

एता जयादिदेवतानां पूजामुद्राः ॥

(षोडशविद्यादेवीनां मुद्राः)

१ शङ्खमुद्रा—वामहस्तेन मुष्टिं बद्ध्वा कनिष्ठिकां प्रसार्य शिखा(? शेषा)ङ्गुलीरङ्गुष्ठेन पीडयेदिति शङ्खमुद्रा ॥१॥

२ शक्तिमुद्रा—परस्पराभिमुखहस्ताभ्यां वेणीबन्धं विधाय मध्यमे प्रसार्य संयोज्य च शेषाङ्गुलिभिर्मुष्टिं बन्धयेदिति शक्तिमुद्रा ॥ २ ॥

३ शृङ्खलामुद्रा—हस्तद्वयेनाङ्गुष्ठतर्जनीभ्यां वलके विधाय परस्परान्तःप्रवेशनेन शृङ्खलामुद्रा ॥ ३ ॥

४ वज्रमुद्रा—वामहस्तस्योपरि दक्षिणकरं कृत्वा कनिष्ठिकाङ्गुष्ठाभ्यां मणिबन्धं संवेष्ट्य शेषाङ्गुलीनां विस्फारितप्रसारणेन वज्रमुद्रा ॥ ४ ॥

५ चक्रमुद्रा—वामहस्ततले दक्षिणहस्तमूलं वि(? संनि)वेश्य करशाखा विरलीकृत्य प्रसारयेदिति चक्रमुद्रा ॥ ५ ॥

६ पद्ममुद्रा—पद्माकारौ करौ कृत्वा मध्येऽङ्गुष्ठौ कर्णिकाकारौ विन्यसेदिति पद्ममुद्रा ॥ ६ ॥

७ गदामुद्रा—वामहस्तमुष्टेरुपरि दक्षिणमुष्टिं कृत्वा गात्रेण सह किंचिदुन्नामयेदिति गदामुद्रा ॥ ७ ॥

८ घण्टामुद्रा—अधोमुखवामहस्ताङ्गुलीर्घण्टाकाराः प्रसार्य दक्षिणेन मुष्टिं बद्ध्वा तर्जनीमुर्द्रां (? मूर्ध्वां) कृत्वा वामहस्ततले नियोज्य घण्टावचालनेन घण्टामुद्रा ॥ ८ ॥

९ कमण्डलुमुद्रा—उन्नतपृष्ठहस्ताभ्यां संपुटं कृत्वा कनिष्ठिके निष्कास्य योजयेदिति कमण्डलुमुद्रा ॥ ९ ॥

१० परशुमुद्रा—पताकाबद्ध(? वद्) हस्तं प्रसार्य अङ्गुष्ठसंयोजनेन परशुमुद्रा ॥ १० ॥

११ परशुमुद्रा द्वितीया—यद्वा पताकाकारं दक्षिणकरं संहताङ्गुलिं कृत्वा तर्जन्यांगुष्ठक्रमेण (? तर्जन्यङ्गुष्ठाक्रमणेन) परशुमुद्रा द्वितीया ॥ ११ ॥

१२ वृक्षमुद्रा—ऊर्ध्वदण्डौ करौ कृत्वा पद्मवत् करशाखाः प्रसारयेदिति वृक्षमुद्रा ॥ १२ ॥

१३ सर्पमुद्रा—दक्षिणहस्तं संहि(? ह)ताङ्गुलिमुन्नमय्य सर्पफणावत् किञ्चिदाकुञ्चयेदिति सर्पमुद्रा ॥१३॥

१४ खड्गमुद्रा—दक्षिणकरेण मुष्टिं बद्ध्वा तर्जनीमध्यमे प्रसारयेदिति खड्गमुद्राः(? द्रा) ॥ १४ ॥

१५ ज्वलनमुद्रा—हस्ताभ्यां संपुटं विधायाङ्गुलीः पद्मवद्विकास्य मध्यमे परस्परं संयोज्य तन्मु(? न्मू)ललग्नाङ्गुष्ठौ कारयेदिति ज्वलनमुद्रा ॥ १५ ॥

१६ श्रीमणिमुद्रा—बद्धमुष्टेर्दक्षिणकरस्य मध्यमाङ्गुष्ठतर्जन्यौ(? न्यो) मूलात्क्रमेण प्रसारयेदिति श्रीमणिमुद्रा ॥ १६ ॥

एताः षोडशविद्यादेवीनां मुद्राः ॥ छ ॥

(४ दिक्पालानां मुद्राः)

१ दण्डमुद्रा—दक्षिणहस्तेन मुष्टिं बद्ध्वा तर्जनीं प्रसारयेदिति दण्डमुद्रा ॥ १ ॥

२ पाशमुद्रा—परस्परोन्मुखो(? खौ) मणिबन्धाभिमुखकरशाखौ करौ कृत्वा ततो दक्षिणाङ्गुष्ठकनिष्ठिकाभ्यां वाममध्यमानामिके तर्जनी (? तर्जनीं) च तथा वामाङ्गुष्ठकनिष्ठाभ्यामितरस्य मध्यमानामिके तर्जनीं समाका (? क) मयेदिति पाशमुद्रा ॥ २ ॥

३ शूलमुद्रा—परस्पराभिमुखमूर्ध्वाङ्गुल्यौ करौ कृत्वा तर्जनीमध्यमानामिका विरलीकृत्य परस्परं संयोज्य कनिष्ठाङ्गुलौ (? ष्ठौ) पातयेदिति शूलमुद्रा ॥ ३ ॥

४ शूलमुद्रा द्वितीया—यद्वा पताकाकारं करं कृत्वा कनिष्ठिकामङ्गुष्ठेनाक्रम्य शेषाङ्गुली [:] प्रसारयेदिति शूलमुद्रा द्वितीया ॥ ४ ॥

एताः पूर्वोक्ताभिः सह दिक्पालानां मुद्राः ॥

(विसर्जनमुद्रा)

१ संहारमुद्रा—ग्राह्यस्योपरि हस्तं प्रसार्य कनिष्ठिकादितर्जन्यन्तानामङ्गुलीनां क्रमसङ्कोचनेनाङ्गुष्ठमूलानयनात् संहारमुद्रा ॥

विसर्जनमुद्रेयं ॥

[३ देवदर्शनमुद्राः]

१ परमेष्ठिमुद्रा—उत्तानहस्तद्वयेन वेणीबन्धं विधायाङ्गुष्ठाभ्यां कनिष्ठिके तर्जनीभ्यां च मध्यमे संगृह्यानामिके समीकुर्यादिति परमेष्ठिमुद्रा ॥ १ ॥

२ परमेष्ठिमुद्रा द्वितीया—यद्वा वामकराङ्गुलीरूर्ध्वीकृत्य मध्यमां मध्यमे(? मध्ये) कुर्यादिति परमेष्ठिमुद्रा द्वितीया ॥ २ ॥

३ पार्श्वमुद्रा—पराङ्मुखहस्ताभ्यां वेणीबन्धं विधायाभिमुखीकृत्य तर्जन्यौ संश्लेष्य शेषाङ्गुलिमध्येऽङ्गुष्ठद्वयं विन्यसेदिति पार्श्वमुद्रा ॥ ३ ॥

एता देवदर्शनमुद्राः ॥

(१९ प्रतिष्ठोपयोगिसामान्यमुद्राः)

इदानीं प्रतिष्ठोपयोगिमुद्रा [:] ॥

१ अञ्जलिमुद्रा—उत्तानौ किञ्चिदाकुञ्चितकरशाखो(? खौ) पाणी विधारयेदिति अञ्जलिमुद्रा ॥ १ ॥

२ कपाटमुद्रा—अभयाकारौ समु(? म)श्रेणिस्थिताङ्गुलीकौ करौ विधायाङ्गुष्ठयोः परस्परमग्रथनेन कपाटमुद्रा ॥ २ ॥

३ जिनमुद्रा—चतुरङ्गुलमग्रतः पादयोरन्तरं किंचिन्न्यूनं च पृष्ठतः कृत्वा समपादकायोत्सर्गेण जिनमुद्रा ॥ ३ ॥

४ सौभाग्यमुद्रा—परस्पराभिमुखौ ग्रथिताङ्गुलीकौ करौ कृत्वा तर्जनीभ्यामनामिके गृहीत्वा मध्यमे प्रसार्य तन्मध्येऽङ्गुष्ठद्वयं निक्षिपेदिति सौभाग्यमुद्रा ॥ ४ ॥

५ योनिमुद्रा—वामहस्ताङ्गुलितर्जन्या कनिष्ठिकामाक्रम्य तर्जन्यग्रं मध्यमया कनिष्ठिकाग्रं पुनरनामिकया आकुञ्च्य मध्येऽङ्गुष्ठं निक्षिपेदिति यानिद्रा [? योनिमुद्रा] ॥ ५ ॥

६ गरुडमुद्रा—आत्मनोऽभिमुखदक्षिणहस्तकनिष्ठिकया वामकनिष्ठिकां संगृह्याधःपरावर्तितहस्ताभ्यां गरुडमुद्रा ॥ ६ ॥

७ नमस्कृतिमुद्रा—संलग्नौ दक्षिणाङ्गुष्ठाक्रान्तवामाङ्गुष्ठौ पाणी नमस्कृतिमुद्रा ॥ ७ ॥

८ मुक्ताशुक्तिमुद्रा—किञ्चिद्गर्भितौ हस्तौ समौ विधाय ललाटदेशे योजनेन मुक्ताशुक्तिमुद्रा ॥ ८ ॥

९ प्रणिपातमुद्रा—जानुहस्तोत्तमाङ्गादिसंप्रणिपातेन प्रणिपातमुद्रा ॥ ९ ॥

१० त्रिशिखमुद्रा—संमुखहस्ताभ्यां वेणीबंधं विधाय मध्यमाङ्गुष्ठकनिष्ठिकानां परस्परयोजनेन त्रिशिखि-(? ख)मुद्रा ॥ १० ॥

११ भृङ्गारमुद्रा—पराङ्मुखहस्ताभ्यामङ्गुलीर्विदर्भ्य मुष्टिं बद्ध्वा तर्जन्यौ समीकृत्य प्रसारयेदिति भृङ्गारमुद्रा ॥ ११ ॥

१२ योगिनीमुद्रा—वामहस्तमणिबन्धोपरि परात्मु(? ङ्मु)खं दक्षिणकरं कृत्वा करशाखा विदर्भ्य किञ्चिद्वामवलनेनाधोमुखाङ्गुष्ठाभ्यां मुष्टिं बद्ध्वा समुत्क्षिपेदिति योगिनीमुद्रा ॥ १२ ॥

१३ क्षेत्रपालमुद्रा—ऊर्ध्वशाखं वामपाणिं कृत्वाङ्गुष्ठेन कनिष्ठिकाना(? मा)क्रमयेदिति क्षेत्रपालमुद्रा ॥ १३ ॥

१४ डमरुकमुद्रा—दक्षिणकर (? रेण) मुष्टिं बद्ध्वा कनिष्ठाङ्गुष्ठौ प्रसार्य डमरुकवच्चालयेदिति डमरुकमुद्रा ॥ १४ ॥

१५ अभयमुद्रा—दक्षिणहस्तेनोर्ध्वाङ्गुलिना पताकाकारेण अभयमुद्रा ॥ १५ ॥

१६ वरदमुद्रा—तेनैवाधोमुखेन वरदा [मुद्रा] ॥ १६ ॥

१७ अक्षसूत्रमुद्रा—वामहस्तस्य मध्यमाङ्गुष्ठयोजनेन अक्षसूत्रमुद्रा ॥ १७ ॥

१८ त्रासनीमुद्रा—बद्धमुष्टेर्दक्षिणहस्तस्य प्रसारिततर्जन्या वामहस्ततलताडनेन त्रासनी ॥ १८ ॥

१९ विश्वमुद्रा—पद्ममुद्रैव प्रसारिताङ्गुष्ठसंलग्नमध्यमाङ्गुल्यग्रा विश्वमुद्रा ॥ १९ ॥

एताः सामान्यमुद्राः ॥ छ ॥ ॥ श्रीः ॥ ॥ श्रीः ॥

॥ इति मुद्राविचारः ॥

ANJALI
GARUDA
VARADA
KAVACHA
DHENU
ABHAYA
PARAŚU
SANNIDHAPANI

मुद्राविधि

॥ अथ मुद्राविधिः ॥

१ ॐकारमुद्रा—दक्षिणहस्तस्य मुष्टिबंधने दक्षिणांगुष्ठाग्रस्य चोटिवत्कर्षणे ॐकारमुद्रा ॥ सर्वत्र स्मरणावसरे सर्वरत्नाधिकानां ध्येयविषये च कार्ये आयाति। अत्र बीजं प्रणव एव ॥ १ ॥

२ ह्रीँकारमुद्रा—वामांगुष्ठाग्रं दक्षिणांगुष्ठपृष्ठलग्नं, तथा वामतर्जन्यग्रं दक्षिणांगुष्ठाग्रे संयोज्य, वाममध्यमादक्षिणतर्जनीयोजने वामाऽनामिकादक्षिणमध्यमां संयोज्य वामकनिष्ठिकां बिंदुवत्कृत्वा ह्रीँकारमुद्रा। पञ्चवर्णध्यानवश्यार्थयोः अपरसर्वकार्येषु च। अत्र बीजं मायाबीजमेव ॥ २ ॥

३ नकारमुद्रा—वामांगुष्ठं कुण्डलाकारं कृत्वा वामतर्जनीमूले संस्थाप्य वामतर्जनीमध्यमाग्रे २ दक्षिणतर्जन्यां स्थापने नकारमुद्रा। मृतकार्थपूजाढौकनानंतरं शांतिहेतवे क्रियते मंत्रादिकार्ये च ॥ ३ ॥

४ मकारमुद्रा—तत्रैव नकारमुद्रायां मध्यप्रदेशे दक्षिणांगुष्ठं अर्गलावत् स्थाप्यते मकारमुद्रा। व्याख्यानावसरे महिमार्थं सर्वत्र मंत्राधिकारे च ॥ ४ ॥

एतन्मुद्राचतुष्कं कलशस्था[प]ने मुद्राऽ(?)पहारे। नकारमुद्रायां न एव बीजम्, मकारमुद्रायां म एव बीजम्, 'अ'श्च मुद्रायामेव।

५ सिंहमुद्रा—तर्जनीअनामिकयोः पश्चादाकुञ्चने सिंहमुद्रा। वर्धमानविद्यागुणनावसरे श्रीवर्धमानजिनप्रतिष्ठायां च। अत्र बीजं 'अ'कार एव ॥ ५ ॥

६ ऐंकारमुद्रा—दक्षिणकरतर्जनीमध्ये शकटाकारं कृत्वा वामतर्जन्यां स्थापने वाममध्यमाऽनामिकाकनिष्ठिकाः नादबिंदुकलाकाराः क्रियन्ते। ऐंकारमुद्रा त्रिकोणाकारा सारस्वतमंत्रगुणने वश्यार्थे च। अत्र बीजं आ ॥ ६ ॥

७ शङ्खमुद्रा—अंगुष्ठद्वययोजने तर्जनीद्वयस्य सृष्टया कुंडलाकारविधाने मध्यमाद्वय(?यं) परस्पर(?रं) [प्रसार्य] संमील्य च दक्षिणावर्तशङ्खमुद्रा। एषैव तर्जनीद्वयस्य संहा(?ह)रणे कुण्डलाकारविधाने वामावर्तशङ्खमुद्रा। दक्षिणावर्तशङ्खमुद्रा लक्ष्मीसुताद्यर्थ(?र्थे) मंत्रस्मरणे [वामावर्तशङ्खमुद्रा ?] मंगलीकालेखप्रतिष्ठायां वासाभिमंत्रणे च। बीजमत्र इ ॥ ७ ॥

८ चतुष्कपट्टमुद्रा—परस्पराभिमुखमध्यमाद्वयं अनामिकाद्वयं संयोज्य तर्जनीद्वय (?यं) कनिष्ठिकाद्वयं चतुष्पादवन्नियोज्य चतुष्कपट्टमुद्रा। सर्वसंघाधिपप्रमुखकार्येषु कार्या। बीजं ई ॥ ८ ॥

९ नागवेलिपत्रद्वयमुद्रा—हस्तद्वयस्यांगुष्ठद्वययोजने तर्जनीद्वयस्य ऊर्ध्वयोजने पत्रमुद्रा, नागवेलिपत्रोपरि मध्यमाद्वययोगे ऊर्ध्वीकरणे नागवेलिपत्रद्वयमुद्रा। बीजं 'उ'। इति लौकिकं-

नाम सर्ववस्तुस्थापनानंतरं मंगलिकार्थं अग्रे ढौकनाय एनद् द्वयं क्रियते । बीजं उ ॥ ९ ॥

१० योनिमुद्रा—संमुखं अंगुष्ठौ संपीड्य तर्जनीद्वयं च परस्परं संपीड्याऽवाच्याकारवत् प्रलंबीकरणे योनिमुद्रा सर्वत्र वश्यार्थे, बीजं ऊ ॥ १० ॥

सर्वसंख्यया ॥ १० ॥

११ पञ्चपरमेष्ठिमुद्रा—करद्वयांगुष्ठाभ्यां मध्यमाद्वयं संपीड्य अनामिकाद्वयं संपीड्य च तदुपरि तर्जनीद्वयं योजयित्वा प्रकारांतरेण पञ्चपरमेष्ठिमुद्रा मोक्षसाधनार्थं, बीजं ऋ ॥ ११ ॥

१२ पञ्चपरमेष्ठिमुद्रा—अस्या एव पंचयोनिर्नामांतरं महत्कार्यसाधनावसरे, बीजं ॠ ॥ १२ ॥

१३ त्रिद्वारजिनालयमुद्रा—करद्वयस्य मध्यमयोः ऊर्ध्वीकरणे मशीतवत् तदुपरि तर्जन्योः संस्थापने त्रिद्वारजिनालयमुद्रा सामान्यचैत्यगृहस्थापनातत्प्रतिष्ठादौ ॥ बीजं ऌ ॥ १३ ॥

१४ स्वस्तिकमुद्रा—दक्षिणकरमध्यमोपरि वाममध्यमां कृत्वा मध्यमयोस्तयोरग्रे तर्जनीद्वयपरस्परयोगो तयोर्मूले अंगुष्ठद्वयसंस्थापने स्वस्तिकमुद्रा शकुनविलोकनावसरे प्रतिष्ठादौ च बीजं । ॡ ॥ १४ ॥

१५ चतुर्मुखमुद्रा—कोशाकारौ करौ कृत्वा तर्जनीद्वयाऽनामिकाद्वययोः ऊर्ध्वीकरणे । प्रासादवत् करणे अपरांगुलीअधोस्थापने चतुर्मुखमुद्रा, चतुर्जटीनालिकेर-चतुर्मुखप्रासाद नन्दिप्रमुखप्रतिष्ठादौ बीजं ए ॥ १५ ॥

१६ कल्याणत्रयमुद्रा—मशीतमुद्रावन्मध्यमाद्वयं ऊर्ध्वीकृत्य तर्जनीद्वयस्यात्मसंमुखीकरणअंगुष्ठद्वयतर्जनीद्वय नखा एकत्रमीलने कल्याणत्रयमुद्रा, त्रिनेत्रनालिकेर-त्रिमुखीरुद्राक्ष-कल्याणत्रयस्य प्रतिष्ठायां बीजं ऐ ॥ १६ ॥

१७ सामान्यजिनालयमुद्रा—हस्तद्वयस्य कनिष्ठिकाऽनामिकामध्यमानां सर्पफणावत्करणे सामान्यजिनालयमुद्रा सामान्यगृहचैत्यस्थापनावसरे सामान्यजिनालयप्रतिष्ठायां च बीजं ओ ॥ १७ ॥

१८ कपाटमुद्रा—कोशाकारौ करौ कृत्वा अंगुष्ठद्वयप्रथने मध्ये शुषिरे कपाटमुद्रा, प्रतिष्ठायां आच्छादनाधिकारे चक्षू [क्षुरु]न्मीलनावसरे उद्घाट्यते कमलप्रतिष्ठायां च बीजं औ ॥ १८ ॥

१९ तोरणमुद्रा—हस्तद्वयमध्यमाद्वयं तोरणवत्संयोज्य हस्तद्वयतर्जन्यौ तदुपरि वक्रीकृत्य तर्जनीद्वयमूले संयुक्तांगुष्ठद्वयस्य कुंभिकाकारकरणे तोरणमुद्रा । नवीनपुरगृहशालाप्रवेशे शकुनविलोकनावसरे च, बीजं क ॥ १९ ॥

२० शक्तिमुद्रा—परस्पराभिमुखहस्ताभ्यां वेणीबंधं विधाय प्रसार्य संयोज्य च शेषांगुलिभिर्मुष्टिं बंधयेत् इति शक्तिः-प्रहरणविशेषस्तस्य मुद्रा । मरकोपद्रवनिवारणे भृगुकच्छ ऊजेणी ढीली नगरीई विशेष फलदा, बीजं ख ॥ २० ॥

सर्वसंख्यया ॥ २० ॥

२१ ईश्वरमुद्रा—सौभाग्यमुद्रावत्कृत्वा अंगुष्ठद्वयं तर्जनीद्वयं योगे योगे ईश्वरमुद्रा, यस्मिन् ग्रामे ईश्वरप्रासादौ(? दो) भवति तस्मिन् ग्रामे मिथ्यात्वीयस्थाने च क्रियते बीजं ग ॥ १२ ॥

२२ अमृतसञ्जीविनीमुद्रा—उभयकरांगुलीग्रथने मध्ये कुंभाकारं कृत्वांगुष्ठद्वयोर्ध्वीकरणे नाशिकाद्वारे विन्यस्य पवनलिहनं क्रियते अमृतसञ्जीविनीमुद्रा। पानावसरे, बीजं घ ॥ २२ ॥

२३ त्रिनेत्रमुद्रा—संमुखीनकरद्वयांगुष्ठतर्जन्यौ संयोज्य मध्यमाद्वयं च संयोज्य च त्रिनेत्रमुद्रा। यत्र रुद्रकोपो भवति तत्र तदुपशमहेतवे बीजं ङ ॥ २३ ॥

२४ त्रिपुरसमुद्रा—संमुखकरद्वयस्य मध्यमाद्वयं मशीतवत् संस्थाप्य तर्जनीद्वयं तदुपरि वक्रीभूतं क्रियते त्रिपुरस[?]मुद्रा, मिथ्यात्वीयानां स्थाने वश्यार्थे च, बीजं च ॥ २४ ॥

२५ मशीतमुद्रा—करद्वयस्य संमुखांगुलीग्रथनं कृत्वा पश्चान्मध्यमाद्वयं ऊर्ध्वीकृत्य मशीतआकारवत् क्रियते मशीतमुद्रा, म्लेच्छस्थाने पृष्ठपट्टस्थापनावसरे च, बीजं छ ॥ २५ ॥

२६ गृहतोडामुद्रा—अस्त्रमुद्राप्रणवमुद्राभ्यां सार्धं कृताभ्यां गृहतोडामुद्रा गृहप्रवेशे नवीनबिंबप्रवेशे च, बीजं ज ॥ २६ ॥

२७ सिंहासनमुद्रा—परस्परं पृष्ठलग्नपाणी ग्रथितांगुलीकौ अधःकृत्वा कनिष्ठिकाद्वयं पृष्टि(? ष्ठ)पट्टस्थाने ऊर्ध्वीकृत्य सिंहासनमुद्रा, प्रासादे मूलनायकादीनां बिम्बानां स्थापने आचार्यपदस्थापनादिकारे(? र्ये) च, बीजं झ ॥ २७ ॥

२८ पद्मकोशमुद्रा—कोशाकारौ करौ कृत्वाऽनामिकाद्वयस्यांगुष्ठलगनं कनिष्ठिकाद्वयस्य मध्ये प्रतिमाकारं कृत्वा पद्मकोशमुद्रा, नन्द्यावर्त्तस्थापना-धान्यकोष्ठागाराऽशलन-पद्मकोशप्रतिष्ठासु बीजं ञ ॥ २८ ॥

२९ सामान्यपद्ममुद्रा—दक्षिणकर एक एव प्रसारितांगुलीकः सामान्यपद्ममुद्रा सर्वत्र मंत्रपूजावसरे, बीजं ट ॥ २९ ॥

३० नेत्रमुद्रा—हस्तद्वयांगुष्ठद्वयतर्जनीद्वययोगे नेत्राकारे नेत्रमुद्रा बिम्बानां नेत्राञ्जनावसरे प्रथमकपाटोद्घाटनं पश्चान्नेत्रमुद्रा, अधोमुखी प्रतिमादोषो टलयति अनया पुनः सर्वसभावश्यार्थे, बीजं ठ ॥ ३० ॥

सर्वसंख्यया ॥ ३० ॥

३१ विकसितपद्ममुद्रा—कोशाकारावेव करौ कृत्वा पद्मपत्रवत् प्रसारितांगुलीकौ विकसितपद्ममुद्रा प्रतिष्ठाविसर्जनावसरे, बीजं ड ॥ ३१ ॥

कोशाकारौ करौ कृत्वा मध्ये अंगुष्ठौ कर्णिकाकारौ विन्यसेदित्यपि पद्ममुद्रा, एषापि पूजाविशेषे, बीजं ड़ ॥ ३१ ॥

३२ सनालकमलमुद्रा—अञ्जलिं बद्ध्वा द्वयोः करयोरनामिकाद्वयं आत्मसंमुखं क्रियते आमणिबंधं कनिष्ठिकाद्वयं योज्यते अपरांगुलीविरलीकरणे सनालकमलमुद्रा, श्रीगौतममंत्रजाप्यावसरे, बीजं ढ ॥ ३२ ॥

३३ अश्वमुद्रा—दक्षिणकरस्यांगुलीः विरलीकृत्याऽधः मध्यमा किंचिदश्वमुखवद्वक्रीकरणे अश्वमुद्रा, अश्वाधिपानां नवीनप्रासादकारापणे तत्प्रतिष्ठायां अश्वशालायां अश्वदोषनिवारणे च, बीजं ण ॥ ३३ ॥

३४ गजमुद्रा—अश्वमुखमुद्रायामेव वामकरमध्यमा प्रक्षेपे अश्वमुखे दंतयुगलं वामांगुष्ठतर्जमीद्वयं दक्षिणहस्तांगुष्ठकनिष्ठिकाद्वयं च चरणस्थाने नियोज्य च गजमुद्रा, गजाधिपानां नवीनप्रासादकारापणे तत्प्रतिष्ठायां अजितनाथबिंबप्रतिष्ठाविनायकप्रतिष्ठाविनायकमंत्रगुणनेषु कार्येषु, बीजं थ्य (?) ॥ ३४ ॥

३५ दण्डमुद्रा—दंडमुद्रा श्वापदभयनिवारणे बीजं त ॥ लक्षणमाह—दक्षिणहस्तेन मुष्टिं बद्ध्वा तर्जनीं प्रसारयेदिति दण्डमुद्रा ॥ ३५ ॥ क्षेत्रपालदोषनिवारणे च ॥

३६ पार्श्वनाथमुद्रा—पराङ्मुखहस्ताभ्यां वेणीबंधं विधाय अभिमुखीकृत्वा तर्जन्यौ आश्लेष्य शेषांगुलि-मध्ये अंगुष्ठद्वयं विन्यसेदिति पार्श्वनाथमुद्रा ।

श्रीपार्श्वनाथमंत्रजापे सर्प्पभयनिवारणे वश्यार्थे च बीजं थ ॥ ३६ ॥

३७ गरुडमुद्रा—आत्मनोऽभिमुखं दक्षिणहस्तकनिष्ठिकां संगृह्याऽधःपरावर्त्तितहस्ताभ्यां गरुडमुद्रा, परचक्रनिवारणे विषापहरणे दुष्टशाकिन्यादिदोषनिग्रहे पार्श्वनाथबिंबाग्रे च विशेषतः, बीजं द ॥ ३७ ॥

३८ नाराचमुद्रा—दक्षिणांगुष्ठेन तर्जनीमध्यमे समाक्रम्य पुनर्मध्यमामोक्षणेन नाराचमुद्रा, दुष्टरिपु-निग्रहे प्रतिष्ठायां दृग्दोषनिवारणे च, बीजं ध ॥ ३८ ॥

३९ सततमुद्रा—अवाङ्मुखकरद्वयं कृत्वा कनिष्ठिके परस्परं सांडसाबंधेन संबंध्य अंगुष्ठद्वयाऽनामिका-द्वययोः परस्परं संयोज्य मध्यमाद्वयं चंचुवत् प्रसार्य तर्जनीद्वयं चरणयुगलमिव कृत्वा सततः पक्षिविशे[ष]स्तस्य मुद्रा सततमुद्रा, सर्वकार्येषु कार्ये आयाति, बीजं न ॥ ३९ ॥

४० वापीमुद्रा—तोरणमुद्रायामेव अंगुष्ठद्वयप्रसारणे संयोजने च वापीमुद्रा. प्रतिष्ठादौ शांतिकार्येषु बंदिमोक्षादिकार्ये च बीजं प ॥ ४० ॥

४१ कुंभमुद्रा—संकुचितांगुलीकस्य वामहस्तस्य उपरि शिथिलमुष्टिदक्षिणकरस्थापनेन कुंभमुद्रा, एषाऽक्षयनिधिवत् गृहे कुंभस्थापने बंदिमोक्षकार्ये कृष्णकुंभो मंत्र्यते तदग्रे मंत्रो बंदिमोक्षस्य गुणने च, बीजं फ ॥ ४१ ॥

४२ अपरकुंभमुद्रा—पार्ष्णिभ्यां संपुटीकृत्य कूर्म्माकारौ पादौ विधाय मध्ये विवरं क्रियतेऽपरकुंभमुद्रा, प्रासादसामान्यजिनालयशालागृहेषु शिलान्यासे, बीजं ब ॥ ४२ ॥

४३ कुंभमुद्रा—बद्धमुष्ट्योः करयोः संलग्नसंमुखांगुष्ठयोः कुंभमुद्रा । प्रासादे दंडकलशाधिरोपणे देवगुरु-प्रवेशमहोत्सवे संमुखकलशागमने च बीजं भ ॥ ४३ ॥

४४ हृदयमुद्रा—एषैव हृदये यदा योज्यते तदा हृदयमुद्रा, हृदयध्यानावसरे प्रतिष्ठायां बिंबादीनां हृदयन्यासावसरे च बीजं म ॥ ४४ ॥

४५ शिरोमुद्रा—तौ चेन्मुष्टी समीकृतौ ऊर्ध्वांगुष्ठौ शिरसि विन्यसने शिरोमुद्रा, बिम्बादीनां प्रतिष्ठायां शिरसि न्यासावसरे नवीनग्रामप्रवेशे जिनालयगमने अधिष्ठायकवश्ये च, बीजं य ॥ ४५ ॥

४६ शिखामुद्रा—पूर्ववन्मुष्टी बद्ध्वा तर्जन्यौ प्रसारयेदिति शिखामुद्रा स्वदेहरक्षाकार्ये, बीजं र ॥ ४६ ॥

४७ कवचमुद्रा—पुनर्मुष्टिबंधं विधाय कनीयस्यंङ्गुष्ठौ प्रसारयेदिति कवचमुद्रा, व्याख्यानप्रारंभे स्वदेह-रक्षायै धाटीपरचक्रचौरनिवारणे च, बीजं ल ॥ ४७ ॥

४८ घृतभृतकुंभमुद्रा—पूर्ववद् ग्रथितांगुलीकौ करौ कृत्वांगुष्ठाभ्यां पिधानं कुर्यात् मध्ये किंचिद्वरे[? चिद्विवरे] घृतभृतकुंभमुद्रा, प्रासादे घृतपञ्चरत्नसहितं कुंभस्थापनाकार्ये, बीजं व ॥ ४८ ॥

४६ क्षुरमुद्रा—कनिष्ठिकामंगुष्ठेन संपीड्य शेषांगुलीः प्रसारयेदिति क्षुरमुद्रा, नेत्रत्रयस्य न्यासोयं ज्ञानदर्शनचारित्राणां आराधनेऽपि च विलोक्यते, शाकिनीभूतप्रेतनिग्रहे, बीजं श ॥ ४६ ॥

५० भृङ्गारमुद्रा—पराङ्मुखहस्ताभ्यां अंगुलीर्विदर्भ्य मुष्टिं बद्ध्वा तर्जन्यौ समीकृत्य प्रसारयेदिति भृंगारमुद्रा कलशाऽपरपर्यायमुद्रा, ध्वजप्रतिष्ठास्नात्रसंघाधिपाधिकारेषु बिंबादीनां अभिषेके च, बीजं ष ॥ ५० ॥

सर्वसंख्यया ॥ ५० ॥

५१ अस्त्रमुद्रा—दक्षिणमुष्टिं बद्ध्वा तर्जनीमध्यमे प्रसारयेदिति अस्त्रमुद्रा, हृदयादीनां विन्यसने परचक्र-शत्रूच्चाटने च, बीजं स ॥ ५१ ॥

५२ धेनुमुद्रा—अन्योन्यग्रथितांगुलीषु कनिष्ठिकाऽनामिकयोर्मध्यमातर्जन्योश्च संयोजनेन गोस्तनाकारा धेनुमुद्रा, भूमिशुद्धौ सर्वत्र पवित्रीकरणे सर्वत्र शांतिकयंत्रस्थापना क्रियते तत्र पूर्वं एषा क्रियते, बीजं ह ॥ ५२ ॥

दक्षिणहस्तस्य तर्जनीं वामहस्तस्य मध्यमया संदधाने मध्यमां च तर्जन्याऽनामिकां कनिष्ठिकया कनिष्ठिकां चानामिकया एतच्चाऽधोमुखं कुर्यादिषा धेनुमुद्रा इत्यने[न] विशेषंति तत्रापि पूर्वोक्तकार्यं बीजं ज्ञातव्यं ॥ ५२ ॥

५३ प्रतिमामुद्रा—हस्तद्वयस्य मध्यमाद्वयं किंचित् फणावत्कृत्वा तर्जनीद्वयहस्ताकारं कृत्वा अनामिका-द्वयस्य चरणाकारौ कृत्वा प्रतिमामुद्रा, प्रतिमानां प्रतिष्ठामंडने प्रारंभ एव कार्या मंत्रन्यासावसरे पूर्वं स्वहस्तेन प्रतिमामुद्रां कृत्वा दर्श्यते बीजं श्रं ॥ ५३ ॥

५४ स्थापनीमुद्रा—आवाहनी एवाऽधोमुखी स्थापनीमुद्रा सर्वत्रस्थापनावसरे श्राद्धादीनां स्थिरीकरणि-(? णे) च, बीजं अः ॥ ५४ ॥

५५ आवाहनीमुद्रा—हस्ताभ्यां अंजलिं कृत्वाऽनामिकामूलपर्वांगुष्ठसंयोजनेनावाहनी मुद्रा, व्याख्याना-वसरे श्रोतृणामाकर्षणे दशदिक्पालाह्वाने च, बीजं श्क ॥ ५५ ॥

५६ संनिधानीमुद्रा—संलग्नमुष्टी उच्छ्रितांगुष्ठौ करौ संनिधानीमुद्रा, मंत्रादीनां गुणनप्रारंभे क्षुद्रोपद्रवनाशने, च बीजं ठ ॥ ५६ ॥

५७ निष्ठुरामुद्रा—तावेव गर्भगांगुष्ठौ निष्ठुरामुद्रा, चित्तैकाग्र्यकरणे कस्यचित् कोपकरणावसरे च, बीजं अ ॥ ५७ ॥

५८ प्रवहणमुद्रा—उभयकनिष्ठिकामूलसंयुक्तांगुष्ठाग्रद्वयमुत्तानितं सहितं पाणियुगमावाहनं प्रवहणापर-पर्यायं तन्मुद्र(? द्रा) स(? ह)ष्टस्य कस्यचित् विदेशगतस्य पश्चादाकर्षणविषये प्रवहणातरणे च, बीजं आ ॥ ५८ ॥

५६ स्थापनमुद्रा—तदेव तर्जनीमूलसंयुक्तांगुष्ठद्वयमवाङ्मुखं स्थापनमुद्रा, नंदिस्थापनसंघपतिप्रमुखस्था-पनेषु बीजं इ ॥ ५६ ॥

६० अवगुण्ठनमुद्रा—शिरोदेशमारभ्य प्रपदं पार्श्वाभ्यां तर्जन्योर्भ्रमार्पणं अवगुंठनमुद्रा. इत्येके स्वांगरक्षायै मार्गे संघसार्थयो रक्षार्थं दंडकेनात्मनः सकाशात् लेखाकरणे च, बीजं ई ॥ ६० ॥

६१ निरोधमुद्रा—मुष्टिप्रसृतया तर्जन्या देवतामभितः परिक्रमणं निरोधमुद्रा अग्निप्रमुखभयानां टालनार्थं वारिधारावेलायां ध्यानावसरे च, बीजं उ ॥ ६१ ॥

६२ शासनीमुद्रा—बद्धमुष्टेर्दक्षिणहस्तस्य प्रसारिततर्जन्या वामहस्ततलताडनेन शासनीमुद्रा दुष्टनिवारणे दुर्विनीतशिष्यशासने च, बीजं ऊ ॥ ६२ ॥

६३ गोवृषणमुद्रा—बद्धमुष्टेर्दक्षिणहस्तमध्यमातर्जन्योर्विस्फारितप्रसारणेन गोवृषणमुद्रा संघे मार्गे चलति अग्रे प्रथमं एनां कृत्वा चल्यते मंगलार्थं, बीजं ऋ ॥ ६३ ॥

६४ पाशमुद्रा—शासनीगोवृषणमुद्रे नेत्राऽस्त्रयोः पूजार्थं अंगुष्ठे तर्जनीं संयोज्य शेषांगुलीप्रसारणेन पाशमुद्रा दुष्टनिग्रहे, बीजं ॠ ॥ ६४ ॥

६५ महामुद्रा—प्रसारिताभ्यां अधोमुखाभ्यां हस्ताभ्यां पादांगुलीतलान्मस्तकस्पर्शाद् महामुद्रा संघपतिप्रमुखाणां स्थापने जगद्गमनावसरे च, बीजं ऌ ॥ ६५ ॥

६६ अपरपाशमुद्रा—परस्पराभिमुखौ करौ कृत्वा दक्षिणकरमध्यमाऽनामिकाभ्यां वामकरमध्यमाऽनामिकयोर्वलगनं क्रियते अपरपाशमुद्रा अतीवदुष्टनिग्रहे शाकिन्यादिनिग्रहावसरे च, बीजं ॡ ॥ ६६ ॥

६७ अङ्कुशमुद्रा—बद्धमुष्टेर्वामहस्तस्य तर्जनीं प्रसार्य किञ्चिदाकुञ्चयेदित्यङ्कुशमुद्रा वश्यार्थे प्रतिष्ठाविसर्जनावसरे च, बीजं ए ॥ ६७ ॥

६८ अपरअङ्कुशमुद्रा—सौभाग्यमुद्रां कृत्वा द्वे अपि मध्यमे आत्मसंमुखे क्रियेते इति अपरअङ्कुशमुद्रा सामान्यमनुष्यचतुष्पदनिग्रहे च, बीजं ऐ ॥ ६८ ॥

६९ महाङ्कुशमुद्रा—एषैव विपर्यासे आत्मनीनसंमुखे मध्यमे महाङ्कुशमुद्रा संघादीनां दुष्टप्रत्यनीकनिवारणे च, बीजं ओ ॥ ६९ ॥

७० महानागपाशमुद्रा—परस्परोन्मुखौ मणिबन्धाभिमुखकरशाखौ करौ कृत्वा ततो दक्षिणांगुष्ठकनिष्ठिकाभ्यां वाममध्यमाऽनामिके तर्जनीं च तथा वामांगुष्ठकनिष्ठिकाभ्यामितरस्य मध्यमाऽनामिके तर्जनीं समाक्रामयेदिति महानागपाशमुद्रा, लोकोक्त्या वा घडोलउ । प्रतिष्ठादौ दुष्टदेवतानां । बंधनविषये दुष्टनिग्रहे वश्यार्थे सर्पभयनिवारणे च, बीजं औं ॥ ७० ॥

७१ ध्वजमुद्रा—संहतोर्ध्वांगुलिवामहस्तमूले चांगुष्ठं तिर्यग् विधाय तर्जनीचालनेन ध्वजमुद्रा ध्वजारोपादौ शिष्यपदस्थापनानंतरं क्रियते, बीजं क ॥ ७१ ॥

७२ शरामुद्रा—वामहस्तेन मुष्टिकां प्रसार्य शेषांगुलीरंगुष्ठेन पीडयेत् इति शरामुद्रा धवलमायाबीजस्मरणे कामधेनुदुग्धकृते आलोचनाउद्यापनावसाने च, बीजं ख ॥ ७२ ॥

७३ वज्रमुद्रा—वामहस्तस्योपरि दक्षिणकरं कृत्वा कनिष्ठिकांगुष्ठाभ्यां मणिबंधं संवेष्ट्य शेषांगुलीनां विस्फारितप्रसारणेन वज्रमुद्रा प्रतिष्ठादौ अंगरक्षाकृते, बीजं श्क ॥ ७३ ॥

७४ शृङ्खलामुद्रा—यथा वज्रऋषभनाराचबंधनं हस्तद्वयेनांगुष्ठतर्जनीभ्यां वलके विधाय परस्परांतःप्रवेशने शृङ्खला, परस्पराभिमुखौ करौ कृत्वांगुलीग्रथनं क्रियते वामहस्ताङ्गुलीभिर्दक्षिणहस्ताङ्गुल्यः इत्यपि शृङ्खला, दुष्टबन्धनादौ भग्नचित्तशिष्यादीनां स्थिरीकरणे च, बीजं ग ॥ ७४ ॥

७५ वरदमुद्रा—दक्षिणहस्तमुत्तानं विधायाऽधःकरशाखा[ः] प्रसारयेदिति वरदमुद्रा ॥ वरदायिनी मन्त्राधिकारे च, बीजं घ ॥ ७५ ॥

* अङ्कुश १ महाङ्कुश २ ध्वज ३ वरदा ४ एता जयादिदेवतानां पूजामुद्राः ॥

७६ चक्रमुद्रा—वामहस्ततले दक्षिणहस्तमूलं संनिवेश्य करशाखा विरलीकृत्य प्रसारयेदिति चक्रमुद्रा, प्रतिष्ठादौ दुष्टोच्चाटनेऽपि च सर्वदोषनिवारणे च दशारचक्रं, बीजं ङ ॥ ७६ ॥

* दक्षिणाभिमुखी वामहस्ततले उत्तराभिमुखदक्षिणहस्ततलं निवेश्याङ्गुलीर्विरली-कुर्यादिति चक्रमुद्रा ॥

७७ नमस्कृतिमुद्रा—संलग्नौ दक्षिणाङ्गुष्ठाक्रांतवामाङ्गुष्ठौ पाणी नमस्कृतिमुद्रा तत्वचिंतनाधिकारे कोपोपशमने च, बीजं च ॥ ७७ ॥

७८ मुक्ताशुक्तिमुद्रा—किञ्चिद्गर्भितौ समौ करौ विधाय ललाटदेशे योजनेन मुक्ताशुक्तिमुद्रा पापक्षये प्रतिष्ठाधिकारे च, बीजं छ ॥ ७८ ॥

७९ प्रणिपातमुद्रा—जानुहस्तोत्तमांगादिसंप्रणिपातात् प्रणिपातमुद्रा कोपोपशमे भूपादिदर्शनावसरे च, बीजं ज ॥ ७९ ॥

८० योनिमुद्रा—वामहस्ततर्जन्या कनिष्ठिकामाक्रम्य तर्जन्यग्रं मध्यमया कनिष्ठिकाग्रं पुनरनामिकया-कुञ्च्य मध्येऽङ्गुष्ठं निक्षिपेदिति योनिमुद्रा। प्रकारान्तरेण—ग्रथितानां अङ्गुलीनां तर्जनीभ्यामनामिके संगृह्य मध्यपर्वस्थाङ्गुष्ठयोर्मध्यमयोः संधानकरणं योनिमुद्रा इत्यन्ये जैनप्रतिष्ठायां नाशिकान्यासावसरे लिङ्गस्थानन्यासावसरे च वश्यार्थे च, बीजं झ ॥ ८० ॥

८१ त्रिमुखमुद्रा—संमुखहस्ताभ्यां वेणीबंधं विधाय मध्यमाङ्गुष्ठकानां परस्परयोजनेन त्रिमुखमुद्रा त्रिवारउ, देवालयप्रतिष्ठायां त्रिमुखरुद्राक्षप्रतिष्ठायां च, बीजं ञ ॥ ८१ ॥

८२ योगिनीमुद्रा—वामहस्तमणिबन्धोपरि पराङ्मुखदक्षिणकरं कृत्वा विदर्भ्य किञ्चिद्वामवलनेनाऽधो-मुखाङ्गुष्ठाभ्यां मुष्टिं बद्ध्वा समुत्क्षिपेत् योगिनीमुद्रा. मरकोपद्रवनाशने, बीजं ट ॥ ८२ ॥

८३ डमरुकमुद्रा—दक्षिणकरेण मुष्टिं बद्ध्वा कनिष्ठिकाङ्गुष्ठौ प्रसार्य डमरुकवच्चालयेदिति डमरुकमुद्रा अशुभउपद्रवनिवारणे दृष्टिदोषोत्तारणे च, बीजं ठ ॥ ८३ ॥

८४ क्षेत्रपालमुद्रा—ऊर्ध्वशाखं वामपाणिं कृत्वाङ्गुष्ठेन कनिष्ठिकामाक्रमयेदिति क्षेत्रपालमुद्रा. आत्म-रक्षायै चतुर्मासकस्थित्यै नवीनक्षेत्रप्रवेशावसरे प्रासादप्रवेशानंतरं एषा क्रियते, बीजं ड ॥ ८४ ॥

८५ अभयमुद्रा—दक्षिणहस्तेन ऊर्ध्वांगुलिना पताकाकरणादभयमुद्रा, शांतिहेतवे बंदिमोक्षावसरे च, बीजं ढ ॥ ८५ ॥

८६ पाशकमुद्रा—वामहस्तस्य मध्यमाङ्गुष्ठयोजनेन पाशकमुद्रा, यूते जयदायिनी ध्यानविषये च, बीजं ण ॥ ८६ ॥

८७ खड्गमुद्रा—दक्षिणकरेण मुष्टिं बद्ध्वा तर्जनीमध्यमे प्रसारयेदिति खड्गमुद्रा, शिष्यस्थापने परचक्र, ईतिनिवारणे च, बीजं त ॥ ८७ ॥

८८ प्रवचनमुद्रा—दक्षिणाङ्गुष्ठेन तर्जनीं संयोज्य शेषाङ्गुलीप्रसारणेन प्रवचनमुद्रा. सिद्धान्ताभ्यासे व्याख्यानावसरे ध्यानावसरे च, बीजं थ ॥ ८८ ॥

* वामकरेण कलाचिकां धृत्वा दक्षिणकरांगुष्ठयवे तर्जनीअग्रयोजनेन दक्षिणकरकूर्पराधोऽधोमीलितसरलाङ्गुलिवामकरतलोपरि पूर्वाभिमुखतद्रूपदक्षिणकरतलस्थापनेन वा प्रवचनमुद्रा ॥

८९ योगमुद्रा—अन्योऽन्यान्तरिताङ्गुलकोशाकारहस्ताभ्यां कुक्षिउपरि कूर्परस्थाभ्यां योगमुद्रा ध्यानविषये प्रतिष्ठावसरे शक्रस्तवपाठे च, बीजं द ॥ ८९ ॥

९० मङ्गलमुद्रा—हस्ताभ्यां संपुटं कृत्वा अङ्गुलीः पत्रवद्विकाश्य मध्यमे परस्परं संयोज्य तन्मूललग्नावङ्गुष्ठौ कारयेदिति मङ्गलमुद्रा हथलेवावसरे मङ्गलीके च, बीजं ध ॥ ९० ॥

९१ आसनमुद्रा—अञ्जल्याकारहस्तस्योपरि हस्त आसनमुद्रा मङ्गलीकावसरे प्रतिष्ठावसरे च, बीजं न ॥ ९१ ॥

९२ अङ्गमुद्रा -वामकरोद्धृतदक्षिणकरसमालभने अङ्गमुद्रा अङ्गरक्षायै, बीजं प ॥ ९२ ॥

९३ पर्वतमुद्रा—उभयोः करयोरनामिकामध्यमे परस्परानभिमुखे ऊर्ध्वीकृत्य मीलयेच्छेषांगुलीः पातयेदिति पर्वतमुद्रा, स्नात्राधिकारे क्षुद्रोपद्रवनिवारणे च, बीजं फ ॥ ९३ ॥

९४ विस्मयामुद्रा—करस्याऽपरावर्तनं विस्मया मुद्रा चमत्कारदर्शने प्रतिष्ठानन्तरं सर्वदोषनिवारणे च, बीजं ब ॥ ९४ ॥

९५ चुंटनमुद्रा—अनामिकायां अङ्गुष्ठाग्रस्पर्शनं दूर्वावनस्पतिचुंटनमुद्रा शान्ताधिकारे श्रेयोऽर्थे च, बीजं भ ॥ ९५ ॥

९६ श्रीवत्समुद्रा—उभयकरतर्जन्यौ अङ्गुष्ठेन सह संमील्य मध्यमाद्वयं प्रसार्य अनामिकाद्वयं अङ्गुष्ठाऽधः संयोज्यते श्रीवत्समुद्रा शकुनविलो० बीजं म ॥ ९६ ॥

* बिंबहृदयन्यासे श्रीशीतलनाथबिंबप्रतिष्ठायां च मङ्गलीकलेखे च ॥

९७ अक्षमुद्रा—वामहस्तस्य मुष्टिबंधने अक्षमुद्रा, अक्षयनिधितपस्करणे घडलातप अपरपर्याये प्रतिष्ठायां अक्षानां वासक्षेपे च, बीजं य ॥ ९७ ॥

९८ गदामुद्रा—वामहस्तमुष्टेरुपरि दक्षिणमुष्टिं कृत्वा गात्रेण सह किंचिदुन्नामयेदिति गदामुद्रा दुष्टनिवारणे, बीजं र ॥ ९८ ॥

९९ घण्टमुद्रा—अधोमुखवामहस्ताङ्गुलीर्घण्टाकाराः प्रसार्य दक्षिणेन मुष्टिं बद्ध्वा तां ऊर्ध्वां कृत्वा वामहस्ततले नियोज्य घण्टावच्चालनेन घण्टमुद्रा, देवार्चादौ प्रतिष्ठामुहूर्तसाधने च सावधानार्थं क्रियते, व्याख्याप्रारंभे सभासावधानापादने, बीजं ल ॥ ९९ ॥

१०० नादमुद्रा—अङ्गुष्ठरुद्धेतराङ्गुल्यग्रायास्तर्जन्या ऊर्ध्वाकारो नादमुद्रा, ग्रामप्रवेशाधिकारे वाजित्रवादनाधिकारे च, बीजं व ॥ १०० ॥

१०१ कमण्डलुमुद्रा—उन्नतपृष्ठहस्ताभ्यां संपुटं कृत्वा कनिष्ठिकां निष्कास्य योजयेदिति कमण्डलुमुद्रा. पवित्रीकरणे, बीजं श ।। १०१ ।।

१०२ परशुमुद्रा—पताकाबद्धस्तं प्रसार्य अङ्गुष्ठयोजनेन परशुमुद्रा दुष्टसाधने शाकिन्यादिभयनिवारणे च, बीजं ष ।। १०२ ।।

१०३ अपरपरशुमुद्रा—यद्वा पताकाकारं दक्षिणकरं सह चाङ्गुलिं कृत्वा तर्जन्यङ्गुष्ठाक्रमणेन अपर-परशुमुद्रा, दृष्टिदोषोत्तारणे, बीजं स ।। १०३ ।।

१०४ वृक्षमुद्रा—ऊर्ध्वदण्डाकारौ करौ कृत्वा पद्मवत् करशाखाः प्रसारयेदिति वृक्षमुद्रा, अशोकवृक्षकरणे, शिष्यस्थापनादौ च, बीजं ह ।। १०४ ।।

(षोडशविद्यादेवीनां मुद्राः)

१०५ सर्पमुद्रा—दक्षिणं हस्तं संहताङ्गुलिमुन्नमय्य सर्पफणावत्किञ्चिदाकुञ्चयेदिति सर्पमुद्रा, पन्नगादि-उपसर्गनिवारणे शाकिनीनिवारणे च, बीजं अं ।। १ ।।

उभयकरतर्जन्यो(? न्यौ) कुण्डलाकारौ विधाय संमील्य चाऽन्यो अङ्गुष्ठौ योज्यते माङ्गल्यकरणे, बीजं अः ।। २ ।।

१०६ ज्वलनमुद्रा—हस्ताभ्यां संपुटं विधाय अङ्गुलीः पद्मवद्विकाश्य मध्यमे परस्परं संयोज्य तन्मूल-लग्नाङ्गुष्ठौ कारयेदिति ज्वलनमुद्रा, शाकिनीनिवारणे संकटभंजनार्थे च, बीजं घ्या ।। ३ ।।

१०७ शिवशासनमुद्रा—उभौ कूर्परौ एकत्रमीलने उपरि कमलवत्प्रसार्य स्थीयते जिनशासनशिवशासनमुद्रा कोपोपशमे, बीजं ट ।। ४ ।।

१०८ शूलमुद्रा—परा(? र)स्पराभिमुखमर्द्धाङ्गुलिकौ करौ कृत्वा तर्जनीमध्यमाऽनामिका विरलीकृत्य परस्परं संयोज्य कनिष्ठिकाङ्गुष्ठौ पातयेदिति शूलमुद्रा उपसर्गनिवारणे दुष्टोच्चाटन-कामणदोषनिवारणे च, बीजं अं ।। ५ ।।

१०९ श्रीमणिमुद्रा—बद्धमुष्टेर्दक्षिणकरस्य मध्यमाङ्गुष्ठयोजनेन तर्जन्याङ्गुष्ठ[यो]र्मूलाक्रमेण प्रसारयेदिति श्रीमणिमुद्रा। पञ्चदशाक्षरीविद्यापूजायै, बीजं आ ।। ६ ।।

गदाघण्टाकमण्डलुपरशुद(? वृ)क्षसर्पखड्गज्वलनश्रीमणिमुद्राः—षोडशविद्यादेवीनां ज्ञातव्याः ।।

(दिक्पालानां मुद्राः)

११० शूलमुद्रा—यद्वा पताकाकारं करं कृत्वा कनिष्ठिकामङ्गुष्ठेनाक्रम्य शेषाङ्गुलीः प्रसारयेदिति द्वितीय शूलमुद्रा। विकारादिव्यथानिवारणे बीजं इ ।।

दण्डो नागपाशशूलद्वितीयशूलाद्या मुद्राः पूर्वोक्ताभिः सह दिक्पालानां ज्ञातव्याः ।।

१११ संहारमुद्रा—हस्तं प्रसार्य कनिष्ठिकादितर्जन्यन्तानामङ्गुलीनां क्रमसङ्कोचनेनाङ्गुष्ठमूले[न पीडयेत्] संहारमुद्रा विसर्जनमुद्रेयं मन्त्रविसर्जनादौ गुणनप्रांते सर्वदोषनिवारणे च, बीजं ई ।।

११२ परमेष्ठिमुद्रा—उत्तानहस्तद्वयेन वेणीबन्धं विधाय अङ्गुष्ठाभ्यां कनिष्ठिके तर्जनीभ्यां च मध्यमे संगृह्य अनामिके समीकुर्यादिति परमेष्ठिमुद्रा। वासाभिमंत्रणविषये ध्वजाप्रतिष्ठादौ आरात्रिकादौ च, बीजं उ ॥

११३ अञ्जलीमुद्रा—उत्तानौ किञ्चिदाकुञ्चितकरशाखौ पाणी विधाय योजयेदञ्जलीमुद्रा सर्वसंतोषोत्पादनाय, बीजं ऊ ॥

११४ जिनमुद्रा—चतुरङ्गुलमग्रतः पादयोरन्तरं किञ्चिन्न्यूनं पृष्ठतः कृत्वा समपादकायोत्सर्गेण जिनमुद्रा तस्करादिभयनिवारणे, बीजं ए ॥

११५ सौभाग्यमुद्रा—परस्पराभिमुखौ ग्रथिताङ्गुलिकौ करौ कृत्वा तर्जनीभ्यां अनामिके गृहीत्वा मध्यमे प्रसार्य तन्मध्ये अङ्गुष्ठद्वयं निक्षिपेदिति सौभाग्यमुद्रा, सर्ववश्यार्थे श्रेयोऽर्थे च, बीजं ऐ ॥

अत्रैवाङ्गुष्ठद्वयस्याऽधः कनिष्ठिकां तदाक्रांततृतीयपर्विकां न्यसेदिति सौभाग्यमुद्रा वश्यार्थे संमान्यवश्यार्थे च, बीजं ओ ॥

॥ एता मुद्राः ॥

५२ मुद्रा यावत् भवन्ति तावत् ५२ व्यञ्जनानि बीजं। अनुक्रमेण तदनन्तरं १०४ यावत् ५२ वर्णाः पश्चानुपूर्व्या बीजं ज्ञेयं ॥ १०४ ॥ पूठिई बीजं। ५२ वर्णा ऋ ॠ ऌ ॡ वर्णवर्ज्यं। इति गुर्वाम्नायां(? यः) ॥

॥ इति मुद्राविधि समाप्तम् ॥

संवत् १६६३ वर्षे पोस वदि ८ शनौ। श्रीपुण्यरत्नसूरिविजयराज्ये ऋषिगुणरत्नलिखितम्। अहिमदनगरे लिखितम्। शुभं भवतु। कल्याणमस्तु। छ। श्रीरस्तु। लेखकपाठकयोः श्रीरस्तु। छ। शुभं भवतु।

* Portion found in the margin.

BOOKS PUBLISHED IN THE MAHARAJA SAYAJIRAO GAEKWAD HONORARIUM LECTURES SERIES

. ANCIENT FOUNDATIONS OF ECONOMICS IN INDIA: by PROF. K. T. SHAH—1950-51. (Publishers: Vora & Co. Publishers Ltd., Bombay-2) 11-0-0

2. THE GEOLOGY AND MINERAL RESOURCES OF INDIA with reference to Gujarat and Bombay State by Dr. D. N. WADIA, M.A., D.Sc., F.G.S., F.N.I. Geological Adviser to Government of India. 1952-53 2-0-0

3. ANCIENT INDIAN COLONISATION IN SOUTH-EAST ASIA by DR. R. C. MAJUMDAR, M.A., PH.D. Director, History of Freedom Movement in India, Ministry of Education, Government of India. 1953-54 3-12-0

4. TREATMENT OF LANDSCAPE IN EASTERN AND WESTERN POETRY: by DR. C. P. RAMASWAMI AIYAR, K.C.S I., K.C I.E., LL.D., D.LITT. Vice-Chancellor, Banaras Hindu University, Banaras 1955-56 2-4-0

BOOKS PUBLISHED IN THE MAHARAJA SAYAJIRAO III GOLDEN JUBILEE MEMORIAL LECTURES SERIES

1. RĀGA ANE RASA: by PANDIT OMKARNATH THAKUR (in Gujarati) 1950-51 1-12-0

2. GUJARĀTĪ PIṄGALA-NAVĪ DṚṢṬIE: by PROF. RAMNARAYAN V. PATHAK (in Gujarati) 1951-52 1-6-0

3. THE POSTULATES OF RURAL DEVELOPMENT: by SHRI S. K. DEY, I.C.S. Development Commissioner, West Bengal—1952-53 0-7-0

4. THE PROBLEM OF DISCIPLINE IN INDIAN UNIVERSITIES & SELECTION AND TRAINING OF PERSONNEL FOR PUBLIC SERVICES—1955-56 by PROFESSOR N. K. SIDHANTA, M.A. (Cantab.) Vice-Chancellor, Calcutta University, Calcutta 1-0-0

BOOKS PUBLISHED IN THE KIRTI MANDIR LECTURES SERIES

1. STUDIES IN RĀMĀYAṆA: by DEWAN BAHADUR K. S. RAMASWAMI SHASTRI—1944 7-8-0

2. SOME ASPECTS OF THE HINDU VIEW OF LIFE ACCORDING TO DHARMAŚĀSTRA: by K. V. RANGASWAMI AIYANGAR 1952 6-0-0

Can be had from:

The Director, Oriental Institute, Baroda (India).